Gyanshauryam, International Scientific Refereed Research Journal
Available online at : www.gisrrj.com
OPEN ACCESS
© 2024 GISRRJ | Volume 7 | Issue 2 | ISSN : 2582-0095

# इक्बालादिषोडशयोगानामालोचना

**प्रो. प्रभातकुमारमहापात्रः**
**निदेशकः, केन्द्रीयसंस्कृतविश्वविद्यालयः, एकलव्यपरिसरः, अगरतला, त्रिपुरा।**

**Article Info**

**Article History**
Accepted : 25 March 2024
Published : 05 April 2024
**Publication Issue :**
Volume 7, Issue 2
March-April-2024
**Page Number :** 101-106

**शोधसारांशः** - षष्ठाष्टमद्वादशे स्थितः नीचशत्रुराशिगतः वक्राभिलाषी पापैः युक्तः वाऽस्तंगतः क्रूरैः दृष्टः पापर्क्षनीचार्क्षांशगतैर्ग्रहैर्मुथशिली स्यात्तदा सः दुरुष्फलयोगं करोति। तत्र द्वादशषष्ठाष्टमस्थः इत्थशालं कर्तुमिच्छुः स्वराशेः सप्तमराशिगतः राह्वाक्रान्तराशेर्भुक्तभोग्यांशवर्ती ग्रहो निर्बलः स्यात्।

**मुख्यशब्दाः** – निर्बलः, इन्दुवारः, योगः, शीघ्रगतिग्रहः, मन्दगतिग्रहः, षोडशयोगः।

ताजिकग्रन्थान् अनुसृत्य प्रश्नवैष्णवे प्रायशः प्रश्नकुण्डल्याः फलादेशक्रमे इक्बालादिषोडशयोगानामालोचना अधिकतया क्रियते। नष्टद्रव्ययात्राविवाहलाभालाभादिप्रश्नफलादेशः एतैः षोडशयोगैः सिद्ध्यति। अतः ते षोडशयोगाः यथा –

**प्रागिक्कवालो पर इन्दुवारस्तथेत्थशालोऽपर ईसराफः।**

**नक्तं ततः स्याद्यमया मणाऊ कब्बूलतो गैरिकबूलमुक्तम्।।**

**खल्लासरं रद्दमथो दुफालिकुत्थं च दुत्थोत्थदिबीरनामा।**

**तम्बीरकुत्थौ दुरफश्च योगाः स्युः षोडशैषां कथयामि लक्ष्म।।** (ता.नी.सं.त.षो.अ.श्लो.15-16)

प्रसङ्गेऽस्मिन् तेषां लक्षणमालोच्यते ताजीकनीलकण्ठीग्रन्थे एवञ्च प्रश्नवैष्णवे यथा –

**चोत्कण्टके पणफरे च खगाः समस्ताः**

**स्यादिक्कवाल इति राज्यसुखाप्तिहेतुः।**

**आपोक्लिमे यदि खगाः स किलेन्दुवारो**

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License.

**न स्याच्छुभः क्वचन ताजिकशास्त्रगीतः॥**(ता.नी.सं.त.षो.अ.श्लो.17)

अर्थात् यदि सर्वे ग्रहाः कण्टके (1, 4, 7, 10) वा पणफरे (2, 5, 8, 11) स्थाने स्थिताः तदा राज्यसुखाप्तिहेतुः इक्किबालयोगः स्यात्। यदि सर्वे ग्रहाः आपोक्लिमे (3, 6, 9, 12) स्थितास्तदा स योगः ताजिकग्रन्थोक्तः इन्दुवारः स्यात्, सः योगः निश्चयेन शुभो न स्यादिति।

तत्र इत्थशालयोगस्य लक्षणमुक्तं यथा –

**शीघ्रेऽल्पभागैर्घनभागमन्देऽग्रस्थे निजं तेज उपाददीयत।**

**स्यादित्थशालोऽयमथो विलिप्ता लिप्तार्थहीनो यदि पूर्णमेतत्॥**

**शीघ्रे यदा भान्त्यलवस्थितः सन् मन्देऽग्रभस्थे निदधाति तेजः।**

**स्यादित्थशालोऽयमथैष शीघ्रदीप्तांशकांशैरिह मन्दपृष्ठे।**

**स्यादित्थशालोऽयमथैष शीघ्रदीप्तांशकांशैरिह मन्दपृष्ठे॥**

**तदा भविष्यद्गणनायमित्थशालं त्रिधैवं मुथशीलकथनमुः।**(ता.नी.सं.त.षो.अ.श्लो.18-20)

यदि अल्पांशैः शीघ्रगतिग्रहः अधिकांशवति मन्दगतिग्रहे निजं स्वकीयं तेजः उपाददीत। अर्थाद्यस्मिन् कस्मिन्नपि दृष्टिसम्भवे राशौ यावदंशेषु शीघ्रगतिग्रहस्तिष्ठति ततोऽधिमित्रांशे शीघ्रगतिग्रहदीप्तांऽशान्तर्गते एव यदि मन्दगतिग्रहः स्यात्तदैव शीघ्रगतिग्रहस्य तेजो मन्दगतिग्रहोपरि याति, दीप्तांशान्तर्गतत्त्वात्, तदा इत्थशालः योगः स्यात्। यदि शीघ्रगतिग्रहः मन्दगतिग्रहात् विलिप्तालिप्तार्धहीनस्तदा पूर्णेत्थशालसंज्ञकयोगः स्यात्। यदा शीघ्रगतिग्रहः राश्यन्तिमांशे वर्तमानः सन्, अग्रिमराशिस्थिते मन्दगतिग्रहे तेजः निदधाति, तदा अयमित्थशालयोगः स्यात्। अथ एषः शीघ्रगतिग्रहः स्वदीप्तांशाधिकांशैर्मन्दपृष्ठे स्थितः, तदानीं दृष्टयभावात् तदग्रिमसमये दीप्तांशाल्पान्तरसम्भवात् तदा भविष्यन्मुथशीलं गणनीयम्। एवं त्रिधा मुथशीलमाचार्या आहुः। वर्त्तमानं पूर्ण भविष्यच्चेति भेदात्।

तत्र ईसराफयोगलक्षणमाह –

**शीघ्रे यदा मन्दगतेरथैकमप्यंशमभ्येति तदेसराफः।**

**कार्यक्षयो मूसरिफे खलोत्थे सौम्ये न हिल्लाजमतेन चिन्त्यम्॥**(ता.नी.सं.त.षो.अ.श्लो.24)

अर्थात् लग्नाधीशकार्याधीशयोरेकतरोऽधिकगतिग्रहः यदि मन्दगतेर्ग्रहस्य एकमप्यंशमतिक्रमति तदा ईसराफः संज्ञकयोगो भवतीति ज्ञेयः। तत्र पापग्रहजनिते ईसराफयोगे कार्यक्षयः स्यात्। शुभग्रहजनिते मूसरिफे कार्यसिद्धिः भवति।

नक्तयोगलक्षणमुच्यते यथा ताजिकनीलकण्ठ्याम् –

**लग्नेशकार्याधिपयोर्नदृष्टिर्मिथोऽथ तन्मध्यगतोऽपि शीघ्रः।**

**आदाय तेजो यदि पृष्ठसंस्थान्यसेदथान्यत्र हि नक्तमेतत्॥**(ता.नी.सं.त.षो.अ.श्लो.25)

यदि लग्नेशकार्याधिपयोर्मिथो दृष्टिर्न भवेत्तयोरेकतरस्मादन्यतरषष्टाष्टमद्वितीयद्वादशराशिषु अन्यतमस्थाने स्थितो भवेत्तथा तयो: लग्नाधीशकार्याधीशयोर्मध्ये शीघ्रगतिग्रह: पृष्ठसंस्थान्न्यूनग्रहात् तेज आदाय अन्यत्र पुर:स्थग्रहोपरि अर्पयेत्तदा नक्तनामको योग: भवेत्। अत्र सर्वत्र स्वदीप्तांशमध्ये यदि शीघ्रग्रहान्मन्दग्रहोऽधिको भवति तदा शीघ्रे मन्दस्य तेजो दाता, मन्द: शीघ्रस्य तेजो हरो ज्ञेय:। दीप्तांशमध्ये शीघ्रग्रहान्न्यूनांशे मन्दग्रहे शीघ्रे मन्दस्य तेजो हर:, मन्द: शीघ्रस्य तेजो दाता ज्ञेय:।

यमयायोगलक्षणं कथ्यते यथा –

**अन्त:स्थितो मन्दगतिस्तु पश्येद्दीप्तांशकैर्द्वावथ शीघ्रतस्तु।**

**नीत्वा महो यच्छति मन्दगाय कार्यस्य सिद्ध्यै यमय: प्रदिष्ट:।।**(ता.नी.सं.त.षो.अ.श्लो.25)

यदि लग्नेशकार्येशयोरन्तरे स्थित: मन्दगतिग्रह: अथवा लग्नेशकार्येशौ मन्दगतिग्रहं पश्येत्तथा लग्नेशकार्येशयोर्योऽधिकगतिग्रह: तत: महस्तेजो आदाय मन्दिगतिग्रहाय यच्छति चेत्तदा यमय: योग: जायते। तदेव योग: कार्यस्य सिद्ध्यै प्रदिष्ट:।

मणऊयोगलक्षणमुक्तं ताजिकनीलकण्ठ्याम् –

**वक्र: शनिर्वा यदि शीघ्रखेटात्पुरस्तिष्ठति तुर्यदृष्ट्या।**

**एकर्क्षसप्तर्क्षभुवा दृशा वा पश्यन्नथांशैरधिकोनकैश्चेत्।।**

**तेजो हरेत्कार्यपदेत्थशाली स्थितोऽपि वाऽसो मणऊ शुभो न।**(ता.नी.सं.त.षो.अ.श्लो.31)

यदि कुज: वा शनि: शीघ्रगतिग्रहात् पश्चात् वा अग्रे तिष्ठति। तत्र गुप्तारिभावाख्यदृष्ट्या वा शत्रुदृष्ट्या अधिकोनकैरंशै: शीघ्रग्रहतोऽधिकांशै: किन्तु तद्दीप्तांशाल्पैरंशे: शीघ्रग्रहस्य तेजो हरेत्तथा भौमशन्योर्मध्ये एकतर: स्थितश्चेत् तदाऽसौ मणऊयोग: भवति। स शुभो न।

कबूलयोगस्य सामान्यलक्षणं लिखति नीलकण्ठाचार्य: यथा –

**लग्नकार्येशयोरित्थशालेऽत्रेन्द्वित्थशालत: ।**

**कबूलं श्रेष्ठमध्यदिभदैर्नानाविधं स्मृतम्** ।।(ता.नी.सं.त.षो.अ.श्लो.36)

अर्थात् लग्नाधिपतिकार्याधिपयो: इत्थशाले मुथशिले योगे सति तयोरेकतरेण सह चन्द्रस्येत्थशालत: उत्तममध्यमसाधमभेदेन षोडशप्रकारकं कबूलं स्मृतम्। यदि स्वीयहद्दाद्रेष्काणनवांशस्थिते अन्योन्यं कृतममुथशिलेन लग्नकार्येशयोरन्यतरग्रहेण सह इत्थशालत: मध्यमोत्तमकबूलं भवति। तथा स्वगृहोच्चगतस्य चन्द्रस्य लग्नकार्येशान्यतरेण इत्थशालत उत्तमं कबूलं भवति। यदि स्वगृहोच्चस्थस्य चन्द्रस्य नीचरिपुगेहस्थितेन लग्नेशकार्येशयोरन्यतरेणेत्थशालत उत्तमाधमतां कबूलं स्यात्। तथा स्वद्रेष्काणांशगश्चन्द्र: स्वभोच्चस्थेन तयोरन्यतरैणेत्थशालं करोति तदा मध्यमोत्तमं कबूलं स्यात्। यदि स्वद्रेष्काणनवांशगतस्य चन्द्रस्य स्वहद्दादिपदस्येन तयोरन्यतरेणेत्थशालत: मध्यमध्यमं कबूलं भवेत्। हीनाधिकारग्रहजनितं मध्यमं कबूलम्, नीचशत्रुग्रहगृहगतग्रहजनितं मध्यमाधमकबूलं स्यात्। स्वभोच्चाद्यधिकारहीन चन्द्र:

स्वक्रषोच्चस्थितेन लग्नाधीशकार्याधीशयोरन्यतरेण इत्थशाली तदाऽपि तत् उत्तमं कबूलं भवेत्। तादृशश्चन्द्रः स्वहद्दादिगतेन तयोर्लग्नाधीशकार्याधीशयोरन्यतरेणेत्थशाली तदा पूर्ववन्मध्यमं कबूलं भवेत्। यदि स्वर्क्षादिपदरहितेन लग्नाधीशकार्याधीशयोरन्यतरेण सहेत्थशाली तदा मध्यमं कबूलं स्यादिति युक्तं समीचीनं ज्ञायते। तथा तादृशश्चन्द्रः नीचारिस्थेन तयोरन्यतरेण सहेत्थशाली तदा अधमं कबूलमुच्यते। नीचशत्रुराशिगतः चन्द्रः स्वभोच्चस्थितेन लग्नकार्येशान्यतरग्रहेणेत्थशालकृत् तदा अधमोत्तमकम्बूलं भवेत्। नीचारिगेहस्थश्चन्द्रः निजहद्दानिजद्रेक्काणनवांशादिपदस्थेन लग्नकार्येशान्यतरेण मुथशिलयोगर्त्ता भवेत्तदाऽधममध्यमं कबूलमुच्यते। नीचारिगेहस्थश्चन्द्रः पदोनेन लग्नकार्येशान्यतरग्रहेणेत्थशालकृत् तदा अधमं कबूलं ज्ञेयम्। नीचशत्रुराशिस्थः चन्द्रः नीचारिभस्थग्रहेण लग्नेशकार्येशयोरन्यरेण सह इत्थशाली स्यात्तदा अधमाधमं कबूलमुच्यते। यदि सन्तानलाभप्रश्ने कल्प्यते यथा मेषलग्नं तत्र रविः कार्येणः, कुजो लग्नेशोऽपि भवेत्तथा स्वोच्चे स्वगृहे गतः चन्द्रः रविकुजयोरेकतरेण सह मुथशिलं करोति तदा उत्तमोत्तमकार्यकृत् उत्तमोत्तमं कबूलं भवति। पुत्रलाभप्रश्ने धनुर्लग्नं, तदीशो गुरुर्मकरेऽस्ति, चन्द्रः वृश्चिकस्थः, भौमः पञ्चमेशः कार्येशः स्वनीचराशौ (कर्कराशौ) भवेत्तत्र तयोरेकतरेण चन्द्रो मुथशिलयोगकारी च भवेत्तदा कार्यनाशकरमधमाधमं कबूलं भवति।

गैरकम्बुलयोगस्य लक्षणं लिखति नीलकण्ठाचार्यः यत् –

**यस्याधिकारः स्वक्षदिः शुभो नाप्यशुभोऽपि च।**

**केनप्यदृश्यमूर्तिश्च स शून्याध्वग इष्यते ।।**(ता.नी.सं.त.षो.अ.श्लो.55)

यस्य कस्यचिद्ग्रहस्य शुभप्रदः स्वर्क्षादिरधिकारो नास्ति, तथा शुभोऽपि नीचशत्रुवर्गाद्यधिकारो नास्ति केनापि ग्रहेण दृष्टोऽपि न स ग्रहः शून्यमार्गगत इष्यते। यथा – लग्नकार्येशयोरित्थशाले सति चन्द्रः शून्याध्वगः अस्ति, अस्य चन्द्रस्य स्वर्क्षादिपदशून्यत्वात् केनचिद् ग्रहेण इत्थशालो न, अथ ईदृश चन्द्रोऽन्यर्क्षं प्रविश्य स्वक्रषोच्चस्थेत्थशालवान् भवति तदेतत् गौरकम्बूलं ज्ञेयम्।

खल्लासरयोगस्य लक्षणं लिखति नीलकण्ठाचार्यः यत् –

**शुन्येऽध्वनीन्दुरूभयोर्नेत्थशालो न वा युतिः।**

**खल्लासरो न शुभदः कम्बुलफलनाशनः।।**(ता.नी.सं.त.षो.अ.श्लो.61)

चन्द्रः शून्येऽध्वनि मार्गे स्थितः, तथा च उभयोर्लग्नेशकार्येशयोर्मध्ये केनापि ग्रहेण इत्थशालो न वा एकराशौ स्थितोऽपि न तदाऽयं योगः कबूलफलनाशनः खल्लासरः स्यात्, अयं शुभदो न भवति।

रद्दयोगस्य लक्षणं लिखति नीलकण्ठाचार्यः यत् –

**अस्तनीचरिपुवक्रहीनभा दुर्बलो मुथशीलं करोति चेत् ।**

**नेतुमेष न विभुर्यतो महोऽन्ते मुखेऽपि न स कार्यसाधकः ।।**(ता.नी.सं.त.षो.अ.श्लो.62)

अस्तनीचारिराशिगतः वक्रो तेजो विहीनः ग्रहः बलहीनो भवति। यदि ईदृशोग्रहः केचिन्मुथशिलमपि करोति तदा एष दुर्बलो यस्मान्महस्तेजो ग्रहीतुं न समर्थो भवति। अतः स ग्रहः वर्षान्ते वर्षादौ अपि कार्यसाधको न भवति असमर्थत्वात्। स्वयमसमर्थः कथं परार्थसाधनयोग्यः स्यादिति भावः। तदनन्तरं दुफलिकुत्थयोगलक्षणं लिखति नीलकण्ठाचार्यः यत् –

**मन्दः स्वभोच्चादिपदे स्थितश्चेत् पदोनशीघ्रेण कृतेत्थशालः ।**

**तत्रापि कार्ये भवतीति वाच्यं वक्रादिनिर्वीर्यपदे न चेत्स्यात् ।।** (ता.नी.सं.त.षो.अ.श्लो.64)

मन्दगतिकग्रहः स्वभोच्चादिपदे स्थितः सन् स्ववर्गाधिकारशून्यशीघ्रगतिग्रहेण कृतेत्थशालः तदा तत्रापि स्थितौ कार्यं भवति। यदि शीघ्रगतिग्रहो वक्रनीचरिपुक्षेत्रे न भवेदिति दुफालिकुत्थयोगलक्षणं वाच्यम्।

दुत्थोत्थदिवीरयोगकथनम् करोति नीलकण्ठाचार्यः यत् –

**वीर्योनितौ कार्यविलग्ननाथौ स्वर्क्षादिगेनान्यतरो युनक्ति ।**

**अन्यौ यदा द्वौ बलिनौ तदाऽन्यसाहाय्यतः कार्यमुशन्ति सन्तः ।।**(ता.नी.सं.त.षो.अ.श्लो.65)

यदि कार्येशलग्नेशौ बलहीनौ तयोरन्यतरो ग्रहः स्वर्क्षादिगेन केनचित् ग्रहेण युनक्ति मुथशिलं करोति। तदा बलयुक्तौ अन्यौ भिन्नग्रहौ लग्नेशकार्येशान्यतरग्रहेण इत्थशालं कुरुतस्तदाऽप्यन्यसाहाय्यतः कार्यं सफलमुशन्ति।

तंबीरयोगस्य लक्षणं लिखति नीलकण्ठाचार्यः यत् –

**बलीराश्यन्तगोऽन्यर्क्षगामी दीप्तांशकैर्महः ।**

**दत्तेऽन्यस्मै कार्यकरस्तंबीरो लग्नकार्यपोः ।।** (ता.नी.सं.त.षो.अ.श्लो.66)

लग्नेशकार्येशयोर्मध्ये एकतरो बली ग्रहो राश्यन्तगः अग्रिमराशिं गन्तुमिच्छुः सन् दीप्तांशकैर्महस्तेजोऽन्यस्मै ग्रहाय दत्ते तदा कार्यसिद्धिकरस्तम्बीरयोगः स्यात्।

कुत्थयोगलक्षणकथनम् करोति नीलकण्ठाचार्यः यत् –

**लग्नेऽथ केन्द्रे निकटेऽपि वाऽस्य विलग्नदर्शी स्वगृहोच्चदृक्के ।**

**मुसल्लहे स्वे नीजहद्दगो वा बली ग्रहो मध्यगतिस्त्वशीघ्रः ।।**(ता.नी.सं.त.षो.अ.श्लो.67)

यः कश्चिदग्रहो लग्नेऽथ केन्द्रे अपि वास्य केन्द्रस्य निकटे पणफरेऽपि स्थितः विलग्नदर्शी स्वगृहोच्चयुक्तः स्वे मुसल्लहे नवांशे स्थितः निजहद्दगः, मध्यगतिः मन्दगतिग्रहः बली स्यात् सः कुत्थयोगफलप्रदायको भवति।

दुरूष्फलक्षणकथनम् करोति नीलकण्ठाचार्यः यत् –

**लग्नात्षष्ठाष्टमेऽन्त्येऽनृजुररिगृहगो नीचगो वक्रगामी**

**क्रूरैर्युक्तौऽस्तगो वा यदि च मुथशिली क्रूरनीचादिभस्थैः ।**

**क्षुद्दृष्टय क्रूरदृष्टो व्ययरिपुमृतिगैरित्थशालं विधित्सुः**

**कुर्वन्वा निर्बोऽयं स्वगृहनगभगो राहुपुच्छास्यवर्ती** ।।(ता.नी.सं.त.षो.अ.श्लो.71)

लग्नात् षष्ठाष्टमद्वादशे स्थितः नीचशत्रुराशिगतः वक्राभिलाषी पापैः युक्तः वाऽस्तंगतः क्रूरैः दृष्टः पापर्क्षनीचार्क्षंशगतैर्ग्रहैर्मुथशिली स्यात्तदा सः दुरुष्फलयोगं करोति। तत्र द्वादशषष्ठाष्टमस्थः इत्थशालं कर्तुमिच्छुः स्वराशेः सप्तमराशिगतः राह्वाक्रान्तराशेर्भुक्तभोग्यांशवर्ती ग्रहो निर्बलः स्यात्।

**सन्दर्भग्रन्थाः**


1. षट्पञ्चाशिका,दैवज्ञपृथुयशो,चौखम्भा संस्कृत संस्थान,वाराणसी,संस्करणम्-2009
2. प्रश्नवैष्णशास्त्रम्,श्रीसिद्धनारायणदासः,खेमराज श्राकृष्णदास श्रीवेंकटेश्वर बम्वई प्रकाशन-1987
3. प्रश्नभूषणम्,दैवज्ञश्रीजीवनाथः,चौखम्भा संस्कृत संस्थान,वाराणसा, संस्करणन्-1999
4. प्रश्नशिरोमणि,पण्डितरुद्रमणिविरचितः,खेमराज श्राकृष्णदास श्रीवेंकटेश्वर बम्वई, संस्करणम्-2005
5. षट्पञ्चाशिका,दैवज्ञपृथुयशो , बी.के.पब्लिकेशन प्रा.लिमिटेड,भुवनेश्वर, संस्करणम्-2012
6. गणतरङ्गिणि,सुधाकरद्विवेदी,शिव संस्कृत संस्थान, वाराणासी, संस्करणम्-2002
7. भुवनदीपकः, सत्येन्द्र मिश्रः, चौखम्बासंस्कृतप्रतिष्ठानम्, वारणासी, संस्करणम्-2002
8. बृहज्जातकम्, वराहमिहिराचार्यः, चौखम्बासंस्कृतप्रतिष्ठानम्, वारणासी, संस्करणम् - 2009
9. फलदीपिका, मन्त्रेश्वराचार्यः, रञ्जनपब्लिकेशन्स, नईदिल्ली, संस्करणम् - 2009
10. जातकाभरणम्, श्रीढुण्ढिराजः, चौखम्बासंस्कृतभवनम्, वारणासी, संस्करणम् - वि.स.2069